प्रवेश सं० १८२११ विषयः पुराणेतिहासम्. क्रम सं०

नाम भागवतम् (दशम स्कन्धः) ग्रन्थकार

पत्र सं० ३-४२

श्लोक सं० अक्षर सं० (पंक्तौ) १६ पंक्ति सं० (पृष्ठे) ८

आकारः ७.२"×४.७" **14513** लिपिः दे.ना. आधारः को.

वि० विवरणम् अपू०

पी० एस० यू० पी०—७७ एस० सी० ई०—१९५९—५०,०००

नं. ३८३२

Indira Gandhi National Centre for the Arts

सार्द्धंकृतवान्सात्वतांपतिः ९ व्रजेवसन्कि
मकरोन्मधुपुर्यांचकेशवः भ्रातरंचावधीत्कंस
मातुरद्धातदर्हणम् १० देहंमानुषमाश्रित्यक
तिवर्षाणिवृष्णिभिः मधुपुर्यांसहावात्सीत्पत्न्यः
कत्यभवत्प्रभोः ११ एतदन्यच्चसर्वंमेमुनेःकृ
ष्णविचेष्टितं वक्तुमर्हसिसर्वज्ञश्रद्दधानायवि
स्तृतं १२ नैषातिदुःसहाक्षुन्मांत्यक्तोदमपिबा
धतं पिबंतंत्वन्मुखांभोजच्युतंहरिकथामृतं १३

MISSING PAGE 1 TO 2

Indira Gandhi National Centre for the Arts

सूतउवाच एतन्निशम्यभृगुनंदनसाधुवादंवै
यासकिःसभगवानथविष्णुरातं प्रत्यर्च्यकृ
ष्णचरितंकलिकल्मषघ्नंव्याहर्तुमारभतभा
गवतप्रधानः १४ श्रीशुकउवाच सम्यग्व्य
वसिताबुद्धिस्तवराजर्षिसत्तमः वासुदेवक
थायांतेयज्जातानैष्ठिकीरतिः १५ वासुदेव
कथाप्रश्नःपुरुषांस्त्रीन्पुनातिहि वक्तारंप्र
च्छकंश्रोतृंस्तत्पादसलिलंयथा १६ भूमि

र्दृप्तनृपव्याजदैत्यानीकशतायुतैः आक्रांता
भूमिभारेणब्रह्माणंशरणंययौ १७ गौर्भूत्वा
श्रुमुखीखिन्नारुदंतीकरुणंविभोः उपस्थि
तांतिकेतस्मैव्यसनंसमवोचत १८ ब्रह्मा
तदुपधार्याथसहदेवैस्तयासह जगाम
सत्रिनयनंस्तीरंक्षीरपयोनिधेः १९ तत्र
गत्वाजगन्नाथंदेवदेवंवृषाकपिं पुरुषंपुरु

Indira Gandhi National
Centre for the Arts

यमूक्तेनउपतस्थेसमाहितः २० गिरंसमाधौगग
नेसमीरतांनिशम्यवेधात्रिदशानुवाचह गां
पौरुषींमेशृणुतामराःपुनर्विधीयतामाशुतथैव
माचिरं २१ पुरैवपुंसावधृतोधराज्वरोभवद्भिरं
शैर्यदुषूपजन्यतां सयावदुर्व्याभरमीश्वरेश्वरः
स्वकालशक्त्याक्षपयंश्चरेद्भुवि २२ वसुदेव
गृहेसाक्षात्भगवान्पुरुषःपरः जनिष्येत

त्प्रियार्थंसंभवंतु सुरस्त्रियः २३ वासुदेव
कलानंतःसहस्रवदनःस्वराट् अग्रतोभविता
देवोहरेःप्रियचिकीर्षया २४ विष्णोर्मायाभगव
तीययासंमोहितंजगत् आदिष्टाप्रभुणांशेनका
र्यार्थेसंभविष्यति २५ श्रीशुकउवाच इत्य
दिश्यामरगणान्प्रजापतिपतिर्विभुः आश्वास्य
चमहीगीर्भिस्स्वधामपरमंययौ २६ शूरसेनो
यदुपतिर्मथुरामावसन्पुरीं मथुराञ्छूरसे

Indira Gandhi National
Centre for the Arts

नांश्च विषयान्बुभुजे पुरा २७ राजधानी ततः सा
भूत्सर्वयादवभूभुजां मथुरा भगवान्यत्र नित्यं
सन्निहितो हरिः २८ तस्यां तु कर्हिचिच्छौरिर्वसुदे
वकृतोद्वहः देवक्या सूर्यया सार्द्धं प्रयाणे रथमारु
हत् २९ उग्रसेनसुतः कंसः स्वसुः प्रियचिकी
र्षया रश्मीन्हयानां जग्राह रौक्मै रथशतैर्वृ
तः ३० चतुःशतं पारिबर्हं गजानां हेममालिनां
अश्वानामयुतं सार्द्धं रथानां च त्रिषट्शतं ३१ दा

---

सीनां सुकुमारीणां द्वे शते समलंकृते दुहित्रे
देवकः प्रादाद्याने दुहितृवत्सलः ३२ शंख
तूर्यमृदंगाश्च नेदुर्दुंदुभयः समं प्रयाणप्रक्र
मे तावद्वरवध्वोः सुमंगलं ३३ पथि प्रग्रहि
णं कंसमाभाष्याहाशरीरवाक् अस्यास्त्वाम
ष्टमो गर्भो हंता यां वहसे बुध ३४ इत्युक्तः स
खलः पापो भोजानां कुलपांसनः भगिनीं हंतुमा

Indira Gandhi National
Centre for the Arts

रथ्यः क्रूपाणिं कचेगृहीत्‌ ३५ तंजगुप्सितक
र्माणंनृशंसंनिरपत्रपं वसुदेवोमहाभागउवा
चपरिसांत्वयन्‌ ३६ वसुदेवउवाच श्लाघ्यनीय
गुणः शूरैर्भवान्भोजयशस्करः सकथंभगिनीह
न्यात्स्त्रियमुद्वाहपर्वणि ३७ मृत्युर्जन्मवतांवी
रदेहेनसहजायते अद्यवाब्दशतांतेवामृत्युर्वैप्रा
णिनांध्रुवः ३८ देहेपंचत्वमापन्नेदेहीकर्मानुग

जोवशः देहांतरमनुप्राप्यप्राक्तनंत्यजतेवपुः ३९
व्रजंस्तिष्ठन्पदैकेनयथैवैकेनगच्छति यथात्र
णजलूकैवंदेहीकर्मगतिंगतः ४० स्वप्नेयथा
पश्यतिदेहमीदृशंमनोरथेनाभिनिविष्टचेत
नः दृष्टश्रुताभ्यांमनसानुचिंतयन्‌
प्रपद्यतेतत्किमपिह्यपस्मृतिः ४१ यतोय
तोधावतिदैवचोदितंमनोविकारात्मकमाय

Indira Gandhi National
Centre for the Arts

७

पंचसु गुणेषु मायारचितेषु देसौ प्रपद्यमा
नःसह तेन जायते ४२ ज्योतिर्यथैवोदक
पार्थिवेष्वदःसमीरवेगानुगतं विभाव्यते ए
वंस्वमायारचितेष्वसौ पुमान् गुणेषु रागानु
गतो विमुह्यति ४३ तस्मान्न कस्यचिद्द्रोहमाच
माचरेस तथा विधः आत्मनः क्षेममन्विच्छन्द्रोग्धु
र्वै परतो भयं ४४ एभ्रातवानुजा बालाकृपणापु

त्रकोपमा हंतुं नार्हसि कल्याणी मिमां त्वं दीनवत्स
लः ४५ श्रीशुक उवाच एवं स सामभिर्भेदै र्बोध्य
मानोपि दारुणः न न्यवर्त्तत कौरव्य पुरुषादाननु
व्रतः ४५ निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदु
भि प्राप्तं कालं प्रतिव्योढुमिदं तत्रान्वपद्यत ४६
मृत्युर्बुद्धिमता पोह्यो यावद्बुद्धिबलोदयं यद्यसौ
न निवर्तेत नापराधोस्ति देहिनः ४७ प्रदाय मृत्य
वे पुत्रान् मोचये कृपणामिमां सुता मे यदि जा

Indira Gandhi National
Centre for the Arts

प्रेरन्मृत्युर्वोनमिप्येतचेत् ४८ विपर्ययोवाकिंन
स्याद्गतिर्धातुर्दुरत्यया उपस्थितोनिवर्ततेनीवृतः
पुनरावतेत् ४९ ,अग्नेर्यथादारुवियोगयोगयोरद
ष्टतोन्यत्रनिमित्तमस्ति एवंहिजंतोरपिदुर्विभाव्यः
शरीरसंयोगवियोगहेतु ५० श्रीशुकउवाच एवं
विमृश्यतंपापंयावदात्मनिदर्शनं पूजयामासवै
शौरिर्बहुमानपुरःसरं ५१ प्रसन्नवदनांभोजो
नृशंसंनिरपत्रपं मनसादूयमानेनविहसन्निद

---

मब्रवित् वसुदेवउवाच नह्यस्यास्तेभयंसौ
म्यपद्देप्राहाशरीरवाक् पुत्रान्समर्पयिष्येस्या
यतस्तेभयमागतं ५४ श्रीशुकउवाच॥ स्वसु
र्वधान्निववृतेकंसस्तद्वाक्यसारवित् पुत्रान्प्र
वसुदेवोपितंप्रीतः प्रशंस्यप्राविशद्गृहं ५५ अ
थकालउपावृत्ते देवकी सर्वदेवता पुत्रान्
प्रसुषुवेचाष्टौकन्यांचैवानुवत्सरं ५६ की
र्तिमंतंप्रथमजंकंसायानकदुंदुभि ,अर्पया

Indira Gandhi National
Centre for the Arts

मासकृछ्रेणास्नोन्नतादतिविह्वलः ५७ किंदुः
सहंनुसाधूनांविदुषांकिमुपेक्षितं किमका
र्यंकदर्याणंदुस्त्यजंकिंधृतात्मनां ५८ दृ
ष्ट्वासमत्वतच्छौरेः सत्येचैवव्यवस्थितिं कंस
स्तुष्टमनाराजन्प्रहसन्निदमब्रवीत् ५९
प्रतियांतुकुमारोयंनह्यस्मादस्तिमेभयं ,अष्ट
मायुवयोः पुत्रान्मृत्युर्मेविहितःकिलः ६० त
थेतिसुतमादायययावानकदुंदुभिः नाभ्यनंद

ततद्वाक्यमसत्तोविजितात्मनः ६१ नंदाद्या
येव्रजेगोपायाश्चामीषांचयोषितः वृष्णयो
वसुदेवाद्यादेवक्याद्यायदुस्त्रिय ६२ सर्वेवै
देवताप्रायाउभयोरपिभारत ज्ञातयोबंधुसुहृ
दोयेचकंसमनुव्रताः ६३ गतेथवसुदेवेनुदेव
कार्यार्थमुद्यतः एततकंसायभगवान्शशंसाभ्येत्य
नारदः ६४ भूमेर्भारायमाणानांदैत्यानांचवधो
द्यमं ऋषेर्विनिर्गमेकंसोयदून्मत्वासुरानिति दे

Indira Gandhi National
Centre for the Arts

वक्यागर्भसंभूतंविष्णुंचस्ववधंप्रति ६६ देवकीं
वसुदेवंचनिगृह्यनिगडैर्गृहे जातंजातम
हन्पुत्रंतयोरजनशंकया ६७ मातरंपितरंभ्रा
तॄन्सर्वांश्चसुहृदः सखीन् घ्नंतिह्यसुतृपोलु
ब्धाराजानःप्रायशोभुवि ६८ आत्मानमिहसं
जातंजानन्प्राग्विष्णुनाहतं महासुरंकाल
नेमिंयदुभिःसव्यरुध्यतः ६९ उग्रसेनंचपित
रंयदुभोजांधकाधिपं स्वयंनिगृह्यबुभुजेशूर

सेनान्महाबलः ७० इतिश्रीभागवतेमहापुराणेद
स्कंधेकृष्णावतारोनामप्रथमोध्यायः १ श्रीशुकउ
वाच प्रलंबबकचाणूरतृणावर्तमहाशनैः मुष्टि
कारिष्टद्विविदपूतनाकेशिधेनुकैः १ अन्यैश्चासुर
भूपालैर्बाणभौमादिभिर्युतः यदूनांकदनंचक्रेब
लीमागधसंश्रयः २ तेपीडितानिविविशुःकुरुपांचा वि
लकैकयान् शाल्वान्विदर्भान्निषधान्विदेहान्को
शलानपि ३ एकेतमनुरुंधानाज्ञातयःपर्युपा

Indira Gandhi National
Centre for the Arts

सते मथुरायां स्थिता श्चैव ये कूरा ह्याविशांपते ४
हते षुषट् सु बालेषु देवक्या औग्रसेनिना सप्त
मो वै ह्यवंधाम यमनंतं प्रचक्षते ५ गर्भो वभू
व देवक्या हर्षशोक विवर्द्धनः भगवानपि विश्वात्मा
विदित्वा कंसजं भयं ६ यदूनां निर्नाथानां योगमा ज
यां समादिशत् गच्छ देवि व्रजं भद्रे गोप गोभिरलं
कृतं ७ रोहिणी वसुदेवस्य भार्यास्ते नंदगोकुले
अन्याश्च कंससंविग्ना विचरेषुवसंतिहि ८ देवक्या

जठरे गर्भं शेषाख्यं धाम मामकं तत्संनिकृष्य रोहि
ण्या उदरे संनिवेशय ९ अथाहमंशभागेन देवक्याः
पुत्रतां शुभे प्राप्स्यामि त्वाय शोदायां नंद पत्न्यां भवि
ष्यसि १० अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्व
रीं धूपोपहार वलिभिः सर्वकामवरः प्रदां १० ना
मधेयानि कुर्वंति स्थानानि च नरा भुवि दुर्गेति भद्र
कालीति विजयावेष्णवीति च ११ कुमुदा चंडिका कृ
ष्णा माधवी कन्यकेति च माया नारायणी शानी शा

Indira Gandhi National
Centre for the Arts

रदेत्यंविकेतिच १२ गर्भसंकर्षणात्तंवैप्राहुसंक
र्षणंभुवि रामेतिलोकरमणाद्बलभद्रंबलोछ्रया
श्रीशुकउवाच संदिष्टैवंभगवता तथेत्यामि
तितद्वचः प्रतिगृह्य परिक्रम्यगांगतातत्तथा
करोत् १४ गर्भेप्रणीते देवक्यारोहिणीं योग
निद्रया अहोविस्रंसितोगर्भ इतिपौराविचुक्रुशु
१५ भगवानपिविश्वात्माभक्तानामभयंकरः आवि
वेशांशभागेनमनआनकदुंदुभिः १६ सबिभ्र

त्पौरुषंधामभ्राजमानोयथारविः दुरासदोतिदुर्द्ध
र्षोभूतानांसंबभूवह १७ ततोजगन्मंगलमच्यु
तांशंसमाहितंसूरसुतेनदेवी दधारसर्वात्मकमा
त्मभूतंकाष्ठायथानंदकरंमनस्तः १८ सादेवकी
सर्वजगन्निवासनिवासभूतानितरांनरेजे भो
जेंद्रगेहेग्निशिखेवरुद्धासरस्वतीज्ञानखलेय
थासती १९ तांवीक्ष्यकंसःप्रभयाजितांतरां
विरोचयंतींभवनंशुचिस्मितां आहैषमेप्रा

Indira Gandhi National
Centre for the Arts

१३

गहरोर्हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी २०
किमद्य तस्मिन्करणीयमाशु मे यदर्थतंत्रो न
विहंति विक्रमं स्त्रियः स्वसुर्गुरुमत्या वधोयं
यशः श्रियं हंत्यनुकालमायुः २१ स एष जीवं
खलु संपरेतो वर्त्तेत योत्यंतनृशंसितेन देहे
मृते तं मनुजाः शपंति गंता तमोधं तनुमानिनो
ध्रुवं २२ इति घोरतमाद्भावात्संनिवृत्तः स्व
यंप्रभु आस्ते प्रतीक्षंतज्जन्म हरेर्वैरानुबंध

कृत् २३ आसीनः संविशंस्तिष्ठन्भुंजानः पर्यटन्
महीं चिंतयानो हृषीकेशमपश्यत्तन्मयं जगत् २४
ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः देवैः सानु
चरैः साकं गीर्भिर्वृषणमीडतु ब्रह्मादय ऊचुः स
त्यव्रतः सत्यपरं त्रिसत्यं सत्यस्य योनिं निहतं च सत्यं
सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रप
न्नाः २६ एकायनोसौ द्विफलस्त्रिमूलश्चतूरसः पं
चविधः षडात्मा सप्तत्वगष्टविटपो नवाक्षो दशछ

Indira Gandhi National
Centre for the Arts

दशछदी द्विखगो ह्यादिवृक्षः २७ त्वमेक एवास्य
सतः प्रसूतिः स्त्वं संविधानं त्वमनुग्रहश्च त्व
न्मायया संवृतचेतसस्त्वां पश्यन्ति नानानविपश्चि.
तो मे २८ विभर्षि रूपाण्यवबोध आत्मा क्षेमाय लो
कस्य चराचरस्य सत्वोपपन्नानि सुखावहा
नि सतामभद्राणि मुहुः खलानां २९ त्वय्यांबुज
क्षाखिलसत्वधाम्नि समाधिनावेशितचेतसैके त्वत्पा
दपोतेन महत्कृतेन कुर्वंति गोवत्सपदं भवाब्धि

३० स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीम
मदभ्रसौहृदाः भवत्पदांभोरुहनावमंत्र ते नि
धाय याताः सदनुग्रहो भवान् ३१ येन्येरविं
दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबु
द्धयः आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोना
दृतयुष्मदंघ्रय ३२ तथा न ते माधव तावकाः क्व
चित् भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः त्वयाभिगु
प्ता विचरंति निर्भया विनायकानीकपमूर्द्धसु प्रभो

Indira Gandhi National
Centre for the Arts

३३ सत्वंविशुद्धंश्रयतेभवान्स्थितौशरीरिणांश्रेयउ
पायनंवपुः वेदक्रियायोगतपःसमाधिभिस्तवार्ह
णंयेनजनःसमीहते ३४ सत्वंनचेद्धातरिदंनिजं
भवेद्विज्ञानमज्ञानभिदापमार्जनं गुणप्रका
शैरनुमीयतेभवान्प्रकाश्यतेयस्यचयेनवागु
णः ३५ ननामरूपेगुणकर्मजन्मभिर्निरूप
स तव्येतवतस्यसाक्षिणः मनोवचोभ्यामनुमेयव
र्त्मनोदेवक्रियायांप्रतियंत्यथापिहि ३६ शृण्वन्

व

गृणन्संस्मरयंश्चचिंतयन्नामानिरूपाणिच
मंगलानितेक्रियासुयस्त्वच्चरणारविंदयोरा
विष्टचित्तोनभवायकल्पते ३७ दिष्ट्याहरेस्या
भवतःपदोभुवोभारोपनीतस्तवजन्मनेशितुः
दिष्ट्यांकितांत्वत्पदकैःसुशोभनैर्द्रक्ष्यामगांद्यां
चतवानुकंपितां ३८ नतेभवस्येशभवस्यका
रणंविनाविनोदंचततर्कयामहे भवोनिरो
धःस्थितिरप्यविद्ययाकृतायतस्त्वय्यभया

Indira Gandhi National
Centre for the Arts

श्रयात्मनि ३९ मत्स्याश्वकछपवराहनृसिं
हहंसराजन्यविप्रविबुधेषुकृतावतार त्वं
पासिनस्त्रिभुवनंचतथाधुनेशभारंभुवोहर
यदूत्तमवंदनंते ४० दिष्ट्यावतेकुक्षिगतःपरः
पुमान्अंशेनसाक्षाद्भगवान्भवायन माभूद्भ
यंभोजपतेममूर्षोर्गोप्तायदूनांभवितातवात्म
जः ४१ श्रीशुकउवाच इत्यभिष्टूयपुरुषंयद्रूप
मनिदंयथा ब्रह्मेशानौपुरोधायदेवाःप्रतिययुर्दि

वं ४२ इतिश्रीभागवतेमाहापुराणेदशमस्कंधेगर्भ
गतविष्णोःकृतब्रह्मस्तुतिर्द्वितीयोध्यायः २ श्रीशुक
उवाच अथसर्वगुणोपेतःकालःपरमशोभनः य
र्ह्येवाजनजन्मर्क्षंशांतर्क्षग्रहतारकं दिशःप्रसे
दुर्गगनंनिर्मलोडुगणोदयं महीमंगलभूयिष्ठ
पुरग्रामव्रजाकरा २ नद्यःप्रसन्नसलिलाह्रदा
जलरुहश्रियः द्विजालिकुलसन्नादस्तवकाव
नराजयः ३ ववौवायुःसुखंस्पर्शःपुण्यगंधव

Indira Gandhi National
Centre for the Arts

हः शुचिः ॥ अग्नयश्च द्विजातीनां शांतास्तत्र समिं
धत ४ मनांस्यासन्प्रसन्नानि साधूनामसुर
द्रुहां जायमानेऽजने तस्मिन्नेदुर्दुंदुभयो दि
वि ५ जगुः किंनरगंधर्वाः तुष्टुवुः सिद्धचारणा
विद्याधर्यश्च ननृतुरप्सरोभिः समं मुदा ६
मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः
मंदं मंदं जलधरा जगर्जुरनुसागरं ७ निशी
थे तमउद्भूते जायमाने जनार्दने देवक्यां देव

रूपिण्यां विष्णुः सर्वगुहाशयः ॥ आविरासीद्यथा
प्राच्यां दिशींदुरिव पुष्कलः ८ तमद्भुतं बालक
मंबुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधं श्री
वत्सलक्ष्मं गलशोभिकौस्तुभं पीतांबरं सांद्र
पयोदसौभगं ९ महार्हवैडूर्यकिरीटकुं
डलत्विषा परिष्वक्तसहस्रकुंतलं उद्दामकां
च्यंगदकंकणादिभिर्विरोचमानं वसुदेव
ऐक्षत १० स विस्मयोत्फुल्लविलोचनो हरिं

Indira Gandhi National
Centre for the Arts

सुतंविलोक्यानकदुंदुभिस्तदा कृष्णावतारो
त्सवसंभ्रमोस्पृशन्मुदाद्विजेभ्योयुतमाप्लुतोग
वां ११ अथैनमस्तौदवधार्यपूरुषंपरंनतां
गःकृतधीःकृतांजलिः स्वरोचिषाभारतसू
तिकागृहंविरोचयंतंगतभीःप्रभाववित् १२ व
सुदेवउवाच विदितोसिभवान्साक्षात्पु
रुषःप्रकृतेःपरः केवलानुभवानंदस्वरूपः
सर्वबुद्धिदृक् १३ सएवस्वप्रकृत्येदंसृष्ट्वा

ग्रेत्रिगुणात्मकं तदनुत्वंह्यप्रविष्टःप्रविष्टइ
वभाव्यसे १४ यथेमेविकृताभावास्तथाते
विकृतैःसह नानावीर्याःपृथग्भूताविराजं
जनयंतिहि १५ संनिपत्यसमुत्पाद्यदृश्यंतेनुग
ताइव प्रागेवविद्यमानत्वान्नतेषामिहसंभवः १६
एवंभवान्बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैःसन्नपित
द्गुणाग्रहः अनावृतत्वाद्बहिरंतरंनतेसर्वस्यसर्वा
त्मनआत्मवस्तुनः १७ यआत्मनोदृश्यगुणेषुसन्नि

Indira Gandhi National
Centre for the Arts

तिव्यवस्यतेस्वव्यतिरेकतोबुधः विनानुवादंभवत
न्मनीषितंसम्यग्यतस्त्यक्तमुपाददत्पुमान् १८
त्वत्तोस्यजन्मस्थितिसंयमान्विभो वदंत्यनीहा
दगुणाद्विक्रियात् त्वयीश्वरेब्रह्मणिनोविरुध्य
तेत्वदाश्रयत्वादुपचर्यतेगुणैः १९ सत्वंत्रिलोक
स्थितयेस्वमायया बिभर्षिशुक्लंखलुवर्णमात्
मनः सर्गायरक्तंरजसोपबृंहितंकृष्णंचव
र्णंतमसाजनात्यये २० त्वमस्यलोकस्यविभो

श्रि

रिरक्षिषुर्गृहेवतीर्णोसिममाखिलेश्वरः राज
न्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमानानिह
निष्यसेचमूः २१ अयंत्वसभ्यस्तवजन्म
नौगृहेश्रुत्वाग्रजांस्तेन्यवधीत्सुरेश्वरः सते
वतारंपुरुषैःसमर्पितंश्रुत्वाधुनैवाभिसरत्यु
दायुधः २२ श्रीशुकउवाच अथैनमात्मजंवी
क्ष्यमहापुरुषलक्षणं देवकीतमुपाधावत्कंसा
द्भीताशुचिस्मिता २३ देवक्युवाच रूपंयत्तत्प्रा

Indira Gandhi National
Centre for the Arts

हुरव्यक्तमाद्यंब्रह्मज्योतिर्निर्गुणंनिर्विकारं सत्त
मात्रंनिर्विशेषंनिरीहं सत्वंसाक्षाद्विष्णुरध्यात्म
दीपः २४ नष्टेलोकेद्विपरार्द्धावसानेमहाभूते
ष्वादिभूतंगतेषु व्यक्तोव्यक्तंकालवेगेनयाते
भवानेकःशिष्यतेशेषसंज्ञः २५ योयंकाल
स्तस्यतेव्यक्तबंधोचेष्टामाहुःश्चेष्टतेयेनविश्व
म् निमेषादिर्वत्सरांतोमहीयान् तंत्वेशानंक्षे
मधामप्रपद्ये २६ मर्त्योमृत्युर्व्यालभीतःप

हुरव्यक्तमाद्यंब्रह्मज्योतिर्निर्गुणंनिर्विकारं सत्तामात्रं
निर्विशेषंनिरीहं सत्वंसाक्षाद्विष्णुरध्यात्मदीपः २४
नष्टेलोकेद्विपरार्द्धावसानेमहाभूतेष्वादिभूतंगतेषु
व्यक्तेव्यक्तंकालवेगेनयातेभवानेकःशिष्यतेशेष
संज्ञः २५ योयंकालस्तस्यतेव्यक्तबंधोचेष्टामाहुः
श्चेष्टतेयेनविश्वम् निमेषादिर्वत्सरांतोमहीयान्तंत्वे
शानंक्षेमधामप्रपद्ये २६ मर्त्योमृत्युर्व्यालभीतःपलाय
न्सर्वान्लोकान्निर्भयंनाधिगच्छन् त्वत्पादाब्जं

Indira Gandhi National
Centre for the Arts

प्राप्ययदृछयाद्यस्वस्थशेतेमृत्युरस्मादपैति २७ स
त्वंघोरादुग्रसेनात्मजान्नास्त्राहित्रस्तान्भृत्यवित्रा
सहासिरूपंचेदंपौरुषंध्यानधिष्ण्यंमाप्रत्यक्षंमा
दृशांत्वंकृषीष्टा २८ जन्मतेमय्यसौपापोमावि॰
द्यान्मधुसूदन समुद्विजेभवद्धेतोकंसादहम
धीरधी २९ उपसंहरविश्वात्मन्नदोरूपमलौ॰
लौकिकं शंखचक्रगदापद्मश्रियाजुष्टंचतुर्भुजं
३० विश्वंयदेतत्स्वतनौनिशांतेयथावकाशंपुरु

षःपरोभवान् विभर्तिसोयंममगर्भगोभूदहोनृलो
कस्यविडंबनंमहत् ३१ श्रीभगवानुवाच त्वमे
वपूर्वसर्गेभूःपृश्निःस्वायंभुवेसति तदायंसुतपा
नामप्रजापतिरकल्मष ३२ युवांवैब्रह्मणादिष्टौ
प्रजासर्गेयदाततः सन्नियम्येंद्रियग्रामंतेपाथेप
रमंतपः ३३ वर्षवातातपहिमधर्मकालगुणानतु
सहमानौश्वासरोधविनिर्धूतमनोमलौ ३४ शी
र्णपर्णानिलाहारावुपशांतेनचेतसा मत्तःकामा

Indira Gandhi National
Centre for the Arts

नभीप्संतौ मदाराधनमीहतु ३५ एवं वां तप्यतो
स्तीव्रं तपः परमदुष्करं दिव्यवर्षसहस्रा
णि द्वादशेयुर्मदात्मनौ ३६ तदा वां परितु
ष्टोहममुना वपुषानघे तपसा श्रद्धया नित्यं
भक्त्या च हृदि भावित ३७ प्रादुरासं वरदरा
ड् युवयो कामदित्सया व्रियतां वर इत्युक्ते
मादृशो वां वृतः सुतः ३८ अजुष्टग्राम्यविष
यावनपत्यौ च दंपती न वव्राथेपवर्गं मे मोहि

तौ मम मायया ३९ गते मयि युवं लोके शीलौदा
र्यगुणैः समं ते मयि युवं लब्ध्वा वरं मत्सदृशं सु
तं ग्राम्यान्भोगान्भुंजाथां युवां प्राप्तमनोर
थौ ४० अदृष्ट्वान्यतमं लोके शीलौदार्यगुणै
समं अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः
४१ तयोर्वां पुनरेवाहमदित्यामास कश्यपात्
उपेंद्र इति विख्यातो वामनत्वाच्च वामनः ४२
तृतीये स्मिन्भवे हं वै तेनैव वपुषा युवां जा

Indira Gandhi National
Centre for the Arts

तोभूयस्तयोरेवसत्यंमेव्याहृतंसति ४३ एत
द्वांदर्शितंरूपंप्राग्जन्मस्मरणायते नान्यथा
मद्भवंज्ञानंमर्त्यलिंगेनजन्यते ४४ युवांमां
पुत्रभावेनब्रह्मभावेनचासकृत् चिंतयन्तौ
कृतस्नेहौयास्येतेंद्गतिंपरां ४५ श्रीशुकउवाच
इत्युक्त्वासीद्धरीस्तूष्णींभगवानात्ममायया पि
त्रोःसंपश्यतोःसद्योबभूवःप्राकृतःशिशुः ४६
ततःश्चशौरिर्भगवत्प्रचोदितःसुतंसमादाय

ससूतिकागृहात् यदाबहिर्गंतुमियेषतर्ह्यजा-
यायोगमायाजनिनंदजायया ४७ तयाहृतप्र
त्ययसर्ववृत्तिषुद्वाःस्थेषुपौरेष्वनुशायतेष्वथः
द्वारस्तुसर्वेपिहितादुरत्ययाबृहत्कपाटायसकी
लसंखलैः ४८ ताःकृष्णवाहेवसुदेवआगतेस्वयं
व्यशीर्यंतयथातमोरवेः ववर्षपर्जन्यउपांशुगर्
र्जितःशेषोन्वगाद्वारिनिवारयन्फणैः ४९ मघो
निवर्षत्यसकृद्यमानुजागंभीरतोयौघजवोर्मिफेनि

Indira Gandhi National
Centre for the Arts

ला भयानकावर्त्तशताकुलानदीमार्गंददौसिंधुरि
वःश्रियःपते ५० नंदव्रजंशौरिरुपेत्यतत्रतान्गोपा
न्प्रसुप्तानुपलभ्यनिद्रया शिशुंयशोदाशयनेनिः
धायतत्सुतामुपादायपुनर्गृहानगात् ५१ देवक्या
शयनेन्यस्यवसुदेवोथदारिकां प्रतिमुच्यपदोर्लौ
हमास्तेपूर्ववदावृतः ५२ यशोदानंदपत्नीचजातं
परमबुध्यतः नतल्लिंगंपरिश्रांतानिद्रयापगतस्मृ
तिः ५३ इतिश्रीभागवतेमहापुराणेदशमस्कंधेश्री

कृष्णजन्मनितृतीयोध्यायः ३ श्रीशुकउवाच
बहिरंतःपुरद्वारःसर्वाःपूर्ववदावृताः ततोबाल
ध्वनिंश्रुत्वागृहपालासमुत्थिता १ तेतुतूर्णमु
पव्रज्यदेवक्यागर्भजन्मतत् आचख्युर्भोजरा
जाययदुद्विग्नःप्रतीक्ष्यते २ सतल्पात्तूर्णमुत्था
यकालोयमितिविह्वलः सूतीगृहमगात्तूर्णं
प्रस्खलन्मुक्तमूर्द्धजः ३ तमाहभ्रातरंदेवी
कृपणाकरुणंसती स्नुषेयंतवकल्याणि

Indira Gandhi National
Centre for the Arts

स्त्रियं माहं तुमर्हसि ४ बहवोहिं सितभ्रातः शिश
वः पावकोपमाः त्वयादैवनिसृष्टेन पुत्रीकेका प्र
दीयता ५ नत्वंहंतेह्यवरजादीनीतस्तात प्रभो ६ ह
रान्तुमर्हसि मंदायाः प्रेमेमांचरमां प्रजा ७ श्रीशु
कउवाच उपगुह्यात्मजामेवं रुदंत्यादीनदीनवत् या
चितस्तांविनिर्भर्त्स्य हस्तादाचिच्छिदेखलः ७ तांगृही
त्वाचरणयोजातमात्रांस्वसुःसुतां अपोथयच्छि
लापृष्टे स्वार्थोन्मूलितसौहृदा ८ सातद्धस्तात्सम

रजो

त्पत्य सद्योदेव्यंबरंगता अदृश्यंतानुजा विष्णोः सायु
धाष्टमहाभुजा ९ दिव्यस्रगंबरालेपरत्नाभरणभू
षिता धनुःशूलेषुचर्मासिशंखचक्रगदाधर १० सि
धचारणगंधर्वैर प्सरैः किंन्नरोरुपाहतोरुब
लिभिः स्तूयमानेदमब्रवीत् ११ श्रीचंडिकोवाच
किंमयाहतयामंदजातःखलुतवांतकृत् यत्रक्क
वापूर्वशत्रुर्माहिंसीः कृपणांवृथा १२ इतिप्रभा
ष्यतंदेवीमायाभगवती भूवि बहुनामानिकेते

Indira Gandhi National
Centre for the Arts

षुबहुन्नामावभूवह॥ १३ तयाभिहितमाक
र्ण्यकंसः परमविस्मितः देवकीवसुदेवंच
विमुच्यःप्रस्रतोब्रवीत् १४ कंसउवाच॥
अहोभगिन्यहोभाममयावांतवपाप्मना पुरु
षादइवाप्त्यबहवोहिंसितासुता १५ सत्व
हंत्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः कां
लोकान्वैगमिष्यामिब्रह्महेवमृतश्वसन् १६
दैवमप्यनृतंवक्तिनमर्त्याइवकेवलं यद्विश्र

म्भादहंपापःस्वसुर्निहतवान्शिश्रून् १७ मा
शोचतंमहाभागवात्मवांस्वकृतंभुजः जंतवो
नसदैकत्रदैवाधीनास्तदासते १८ भुविभौमा
निभूतानियथायांत्यपयातिचः नायमात्मातथै
तेषुविपर्येतियथैवभू १९ यथानेवंविदोभेदोय
तआत्मविपर्ययः देहयोगवियोगौचसंसृतिर्ननि
वर्तते २० तस्माद्भद्रेस्वतनयान्मयाव्यापादितानपि
मानुशोचयतःसर्वःस्वकृतंविंदतेवशः २१ यव

Indira Gandhi National
Centre for the Arts

जातोस्मिहंतास्मीत्यात्मानंमन्यसेस्वदृक् तावत्तदभि
मान्यज्ञोबाध्यबाधकतामियात् २२ क्षमध्वंममदौरा
त्म्यंसाधवोदीनवत्सला इत्युक्त्वाश्रुमुखःपादौश्या
लःस्वस्त्रोरथाग्रहीत् २३ मोचयामासनिगडाद्वि
श्रब्धःकन्यकागिराः देवकींवसुदेवंचदर्शयन्ना
त्मसौहृदं २४ भ्रातुःसमनुतप्तस्यक्षांतरोषाचदे
वकी व्यसृजद्वसुदेवश्चप्रहस्यतमुवाचह वसुदे
वउवाच एवमेतन्महाभागयथावदसिदेहिनां ।अ

ज्ञानप्रभवाहंधीस्वपरेतिभिदायतः २६ शोक
हर्षभयद्वेषलोभमोहमदान्विताः मिथोघ्नंतंन
पश्यंतिभावैर्भावंपृथग्दृशः २७ श्रीशुकउवाच
कंसएवप्रसन्नाभ्यांविशुद्धंप्रतिभाषितः देव
कीवसुदेवाभ्यामनुज्ञातोविशद्गृहं २८ तस्यांरा श
त्र्यांव्यतीतायांकंसआहूयमंत्रिणः तेभ्यआचष्टत
त्सर्वंयदुक्तंयोगमायया २९ आकर्ण्यभर्तुर्गदि
व तंतमूचुर्देवशत्रवः देवान्प्रतिकृतामर्षादैतेयानातिको

Indira Gandhi National
Centre for the Arts

विद्रा ३० एवं चेत्तर्हि भोजेंद्रपुरग्रामव्रजादिषु ॥
अनिर्दिशांनिर्दिशां स्थ हनिष्यामो घवैशिशून् ३१
किमुधन्वैकरिष्यंतिदेवाः समरभीरवः नित्यमुद्वि॰
ग्नमनसोज्याघोषैर्धनुषस्तव ३२ अस्यतस्तेश
रव्रातैर्हन्यमानाः समंततः जिजीविषवउत्सृज्य
पलायनपरायपु ३३ केचित्प्रांजलयोदीनान्यस्तश न्य
स्त्रादिवौकसः मुक्तकच्छशिखाः केचिद्भीताः स्म इतिवा
दिनः ३४ नत्वंविस्मृतशस्त्रास्त्रान्विरथान्भयसंवि

त्तान् हंस्यन्यासक्तविमुखान्भग्नचापानयुध्यतः
३५ किंक्षेमशूरैर्विबुधैरसंयुगविकत्थनैः रहो
रहोजुषाकिंहरिणाशंभुनावावनौकसा ३६ किं
मिंद्रेणाल्पवीर्येण ब्रह्मणावातपस्यता तथापि
देवाःसापत्न्यान्नोपेक्ष्याइतिमन्महे ३७ ततस्तन्मू
लखननेनियुंक्ष्वास्माननुव्रतान् यथामयो
जसमुपेक्षितोनृभिर्न्नशक्यतेगूढपदश्चि
किंत्सितं यथेंद्रियग्राममउपेक्षितस्तथारिपु

Indira Gandhi National
Centre for the Arts

महान्बद्धबलानचाल्यते ३९ मूलंविष्णुर्हिदेवानां
यत्रधर्मः सनातनः तस्यचब्रह्मगोविप्रास्तपोय
ज्ञाः सदक्षिणाः ४० तस्मात्सर्वात्मनाराजन्
ब्राह्मणान्ब्रह्मवादिनः तपस्विनोयज्ञशीलान्
गाश्चहन्मोहविर्दुघा ४१ विप्रागावश्चदेवाश्चत
पः सत्यंदमः शमः श्रद्धादयातितिक्षाचक्रतवश्च
हरेस्तनूः ४२ सहिसर्वसुराध्यक्षोह्यसुरद्विड्गु
हाशयः तन्मूलादेवताः सर्वाः सेश्वराः सचतुर्मुखा

४३ ,त्वयंवैश्वद्धधोपायोयदृषीणांविहंसनं श्रीशुक
उवाच एवंदुर्मंत्रिभिःकंसः सहसंमंत्र्यदुर्मतिः ब्रह्म
हिंसाहितंमेनकालपाशावृतोसुरः ४४ संदिश्यसाधु
लोकस्यकदनेकदनप्रियान् कामरूपधरान्दि
क्षुदानवान्गृहमंविशत् ४५ तवैरजःप्रकृतय
स्तामसामूढचेतसः सत्ताविदेषमाचेरुरारादाग
तमृत्यवः ४६ ,आयुश्रियंयशोधर्मंलोकानाशिव
एवच हंतिश्रेयांसिसर्वाणिपुंसोमहदतिक्रमः४७

Indira Gandhi National
Centre for the Arts

इति श्रीभागवते महापुराणे दशमस्कंधे असुरमंत्र
णिञ्च चतुर्थोध्यायः ४ श्रीशुकउवाच नंद
स्त्वात्मजउत्पन्ने जाताह्लादो महामना आहूय वि
प्रान्देवज्ञान्स्नातः शुचिरलंकृतः १ वाचयित्वा
स्वस्त्ययनं जातकर्मात्मजस्य वै कारयामास
विधिवत् पितृदेवार्चनं तथा २ धेनूनां नियुते
प्रादाद्विप्रेभ्यः समलंकृते तिलाद्रीन्सप्तरत्नौघा
न् शांतकौंभांबरावृतान् ३ कालेन स्नानशौचा

सतराह रिद्रातैलभूषिता विचित्रधातुबर्हस्रग्वस्त्रकांच



भ्यां संस्कारैस्तपसेज्यया शुध्यंति दानैः संतुष्ट्या
द्रव्याण्यात्मात्मविद्यया ४ सौमंगल्यगिरो वि
प्राः सूतमागधवंदिनः गायकाश्च जगुर्नेदुर्भेर्यो
दुंदुभयो मुहुः ५ व्रजः संमृष्टसंसिक्तद्वाराजिर
गृहांतरः चित्रध्वजपताकास्रक्चैलपल्लवतो
रणैः महार्हवस्त्राभरणकंचुकोष्णीषभूषिता
गोपाः समाययू राजन्नानोपायनपाणयः ८
गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोत्सवं आत्मा तो



Indira Gandhi National
Centre for the Arts

नंभूषयांचक्रुर्वस्त्राकल्पांजनादिभि ९ न
वकुंकुमकिंजल्कमुखपंकजभूतयः बलि
भिःस्त्वरितंजग्मुःपृथुश्रोण्यश्चलत्कुचा १०
गोप्यःसुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांब
रापथिशिखाच्युतमाल्यवर्षाः नंदालयंसवल
यो व्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशो
भाः ११ ताआशिषःप्रयुंजानाश्चिरंपाहीतिबालके
हरिद्राचूर्णतैलाद्भिःसिंचंत्योजनमुज्जगु १२ अ

वाद्यंतविचित्राणिवादित्राणिमहोत्सवे कृष्णेवि
श्वेश्वरेनंतेनंदस्यव्रजमागते १३ गोपाःपरस्प
रंहृष्टादधिक्षीरघृतांबुभि आसिंचंतोविलिं
पंतोनवनीतैश्चचिक्षिपु १४ नंदोमहामनास्ते
भ्योवासोलंकारगोधनं सूतमागधवंदिभ्योये
न्योविद्योपजीविनः १५ तैस्तैःकामैरदीनात्माय
थोचितमपूजयत् विष्णोराराधनार्थायस्वपुत्र
स्योदयायच १६ रोहिणीचमहाभागानंदगोपा

Indira Gandhi National
Centre for the Arts

भिनंदिता व्यचरद्दिव्यवासःस्रक्कंठाभ
रणभूषिता १७ ततआरभ्यनंदस्यव्रज
सर्वसमृद्धिमान् हरेर्निवासात्मगुणैरमा
क्रीडमभून्नृपः १८ गोपान्गोकुलरक्षायां
निरूप्य मथुरांगतः नंदःकंसस्यवार्षिकं
करंदातुंकुरूद्वहः १९ वसुदेवउपश्रुत्य
भ्रातरंनंदमागतं ज्ञात्वादत्तकरंराज्ञेययौ
तदवमोचनं २० तंदृष्ट्वासहसोत्थायदेहे

प्राणमिवागतं प्रीतःप्रियतमंदोर्भ्यांसस्वजे
प्रेमविह्वलः २१ पूजितःसुखमासीनःपृ
ष्ट्वानामयमादृतः प्रसक्तधीःस्वात्मजयो
रिदमाहाविशांपते २२ दिष्ट्याभ्रातःप्रवय
सइदानीमप्रजस्यते प्रजाशायानिवृत्तस्यप्र
जायत्समपद्यतः २३ दिष्ट्यासंसारचक्रेस्मिन्
वर्त्तमानपुनर्भवः उपलब्धोभवानद्यदुर्लभंप्रि
यदर्शनं २४ नैकत्रप्रियसंवासःसुहृदांचित्रक

Indira Gandhi National
Centre for the Arts

मेरणं ,प्रोघेनव्यूहमानानांप्लवांस्रोतसोयथा ५
कच्चित्पशव्यंनिरुजंभूर्यंबुतृणवीरुधं बृह
द्वनंतदधुनायत्रास्तेत्वंसुहृद्वृतः २६ भ्रात
र्ममसुतःकच्चित्मात्रासहभवद्व्रजे तातंभवं
वंतंमन्वानोभवद्भ्यामुपलालितः २७ पुंसस्त्रि
वर्गोविहितःसुहृदोह्यनुभावितः नतेषुक्लिश्यमा
नेषुत्रिवर्गोर्थायकल्पते २८ नंदउवाचअहो
तेदेवकीपुत्राःकंसेनबहवोहताः एकावशिष्टावरजा

कन्यासापिदिवंगता २९ नूनंह्यदृष्टनिष्ठो
यमदृष्टपरमोजनः ,प्रदृष्टमात्मनस्तत्वंयो
वेदनसमुह्यति ३० वसुदेवउवाच करोवैवा
र्षिकोदत्तोराज्ञेदृष्टावयंचवः नेहस्थेयंबहु
तिथ्यंसंत्युत्पाताश्चगोकुले ३१ श्रीशुकउवाच इति
नंदादयोगोपाःप्रोक्तास्तेशौरिणाययुः ,प्रनोभिरनडुद्यु
क्तैस्तमनुज्ञाप्यगोकुलं ३२ इतिश्रीभागवतेमहा
पुराणेदशमस्कंधेवसुदेवसंगमोनामपंचमोध्यायः५

Indira Gandhi National
Centre for the Arts

श्रीशुकउवाच नंदःपथिवचःशौरेर्नमृषेतिविचिं
तयन् हरिंजगामशरणमुत्पातागमशंकितः कं
सेनप्रहिताघोरा पूतनावालघातिनी शिशूंश्च
चारनिघ्नंतीपुरग्रामव्रजादिषु २ नयत्रश्रव
णादीनिरक्षोघ्नानिस्वकर्मसु कुर्वंतिसात्वतां
भर्तुर्यातुधान्यश्चतत्रहि ३ साखेचर्येकदोत्प
त्यपूतनानंदगोकुलं योषित्वामाययात्मानं
प्राविशत्कामचारिणी ४ तांकेशबंधव्यतिष

क

क्तमल्लिकां बृहन्नितंबस्तनकृच्छ्रमध्यमां सुवाससं
कल्पितकर्णभूषणत्विषोल्लसत्कुंतलमंडिताननां ५
वल्गुस्मितापांगविसर्गवीक्षितैर्मनोहरंतींवनितां
व्रजौकसां अमंसतांभोजकरेणरूपिणींगोप्यः
श्रियंद्रष्टुमिवागतांपतिं ६ बालग्रहस्तत्रविचि
न्वतीशिशून्यदृच्छयानंदगृहेसदंतकं बा
लंप्रतिच्छन्ननिजोरुतेजसं ददर्शतल्पेग्निमि
वाहितंभसि ७ विबुध्यतांबालकमारिकाग्रहं

Indira Gandhi National
Centre for the Arts

चराचरात्मासनिमीलितेक्षणः अनंतमारोपय
दंतमंतकं पथोरगं सन्नमबुद्धिरज्जुधा ८ तां
तीक्ष्णं चित्तामतिवामचेष्टितां वीक्ष्यांतराकोशप
रिच्छदासिवत् वरस्त्रियं तत्प्रभयावधर्षिते निरी
क्षमाणो जननीहितिष्टतां ९ तस्मिंस्तनं दुर्जरवीर्य
मुल्वणं घोरांकमादायशशोददावथ गाढं कराभ्यां
भगवान्प्रपीड्य तत्प्राणैः समं रोषसमन्वितं पिबत्
१० सामुंचमुंचालमितिप्रभाषिणी निपीड्यमाना

खिलजीवमर्मणि विवृत्यनेत्रे चरणौ भुजौ मुहुः प्र
स्विन्नगात्राक्षिपतीरुरोदह ११ तस्याः स्वनेनाति
गभीररंहसा साद्रिर्मही द्यौश्च चचाल सग्रहा रसा
दिशश्च प्रतिनेदुरे जनाः पेतुः क्षितौ वा वनिपातशंकया
१२ निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्च
रणौ भुजावपि प्रसार्य गोष्ठे निजरूपमास्थिता व
ज्राहतो वृत्र इवापतन्नृप १३ पतमानोपि त
देहस्त्रिगव्यूत्यंतरद्रुमान् चूर्णयामास राजे

Indira Gandhi National
Centre for the Arts

दमहदासीतदद्भुतम् १४ इषामात्रोग्रदंष्ट्रास्यं
गिरिकंदरनासिकं गंडशैलस्तनंरौद्रंप्रकी
र्णारुणमूर्द्धजं १५ अंधकूपगंभीराक्षंपुलि
नारोहभीषणं वधसेतुभुजोर्वंघ्रिशून्यतो
यहृदोदरः १६ संतत्रसुःस्मतद्वीक्ष्यगोपा
गोप्यकलेवरं पूर्वंतुतन्निःस्वनितभिन्नहृ
त्कर्णमस्तका १७ बालंचतस्याउरसि क्री
डंतमकुतोभयं गोप्यस्तूर्णंसमभ्येत्यजगृहु

र्जातसंभ्रमाः १८ यशोदारोहिणीभ्यांताःसमंबा
लस्यसर्वतः रक्षांविदधिरेसम्यगोपुछभ्रमणा
दिभिः १९ गोमूत्रेणस्नापयित्वापुनर्गोरजसार्भ
कं रक्षांचक्रुःसशकृताद्वादशांगेषुनामभिः २०
गोप्यःसंस्पृस्यसलिलाअंगेषुकरयोपृथक् न्य
स्यात्मन्यथबालस्यबीजन्यासमकुर्वतः २१ अ
व्यादजोंघ्रिमणिमांस्तवजान्वथोरूयज्ञोऽच्युत
कटितटंजठरंहयास्य हृत्केशवस्त्वदुरईशइन

Indira Gandhi National
Centre for the Arts

स्तकंठं विष्णुर्भुजं मुखमुरुक्रमईश्वरकः २२ च
क्र्यग्रतःसहगदोहरिरस्तुपश्चात्त्वत्पार्श्वयोर्धनु
रसीमधुहाजनश्च कोणेषुशंखउरगायउपर्यु
पेंद्रस्तार्क्ष्यःक्षितौहलधरःपुरुषःसमंतात् २३ इंद्रि
याणिहृषीकेशःप्राणान्नारायणोवतु श्वेतद्वीपप
तिश्चित्तंमनोयोगेश्वरोवतु २४ पृश्निगर्भस्तुतेबु
द्धिमात्मानंभगवान्परः क्रीडंतंपातुगोविंदःशया
नंपातुमाधव २५ वृजंतमव्याद्वैकुंठआसीनंत्वां

श्रियःपति भुंजानंयज्ञभुक्पातुसर्वेग्रहभयंकरः
डाकिन्योयातुधानश्चकूष्मांडायेर्भकाग्रहाः भू
तप्रेतपिशाचाश्चयक्षरक्षोविनायका २७ कोटरा
रेवतीज्येष्ठापूतनामातृकादयः उन्मादायेह्य
पस्मारादेहप्राणेंद्रियद्रुहः २८ स्वप्नदृष्टामहो
त्पातावृद्धबालग्रहाश्चये सर्वेनश्यंतुतेविष्णो
र्नामग्रहणभीरव २९ श्रीशुकउवाच इति
प्रणयबद्धाभिर्गोपीभिःकृतरक्षणं पायपि

Indira Gandhi National
Centre for the Arts

त्वा स्तनं माता सन्य वेशयदात्मजं ३० ताव
न्नंदादयो गोपाः मथुराया व्रजं गता विलो
क्य पूतना देहं बभूवुरितिविस्मिता ३१ नूनं
तवर्षिसंजातो योगेशो वा समासतः स एव
दृष्टो ह्युत्पातो यदादानकदुंदुभि ३२ कलेव
रं परशुभिश्छित्वा तते व्रजौकसः दूरे क्षिप्त्वा
वयवसो निदहन्काष्ठविष्टितं ३३ दह्यमान
स्य देहस्य धूमश्चागुरुसौरभः उत्थितः कृष्ण

निर्भुक्तसपद्याहतपाप्मनः ३४ पूतना लोक
बालघ्नी राक्षसी रुधिराशना जिघांशयापि हर
ये स्तनं दत्वाप सद्गतिं ३५ किं पुनः श्रद्धया भक्त्या
कृष्णाय परमात्मने यछन्प्रियतमं किं नु रक्ता
स्तन्मातरो यथा ३६ पद्भ्यां भक्तिहृदिस्थाभ्यां
वंद्याभ्यां लोकवंदितैः अंगं यस्याः समाक्रम्य
भगवानपिबत्स्तनं ३७ यातुधान्यपि सा स्वर्गमवा
प जननीगति कृष्णभुक्तस्तनक्षीराः किमु गावो नुमा

Indira Gandhi National
Centre for the Arts

मातर ३८ पयांसियासामपिबत्पुत्रस्नेहस्नुता
न्यलं भगवान्देवकीपुत्रःकैवल्याद्यखिलार्थद
३९ तासामाविरतंकृष्णेकुर्वतीनांसुतेक्षणं न
पुनःकल्पतेराजन्संसारेज्ञानसंभव ४० कट
धूमस्यसौरभ्यमवघ्रायव्रजौकसः किमिदंकु
तएवेतिवदंतोव्रजमाययुः ४१ तेतत्रवर्णितंगो
पैपूतनागमनादिकं श्रुत्वातन्निधनंस्वस्ति
शिशोश्चासन्सुविस्मिता ४२ यएतत्पूतनामो

नंदस्वपुत्रमादायप्रेत्यागतउदारधीर्मूर्ध्न्युव
घ्रायपरमांमुदंलेभेकुरूद्वह ४३ यएतत्पू
तनामोक्षंकृष्णस्यार्भकमद्भुतं शृणुयात्श्र
द्धयामर्त्योगोविंदेलभतेरतिं इतिश्रीभागवतेम
हापुराणेदशमस्कंधेपूतनामोक्षोनामषष्ठो
ध्यायः ६ राजोवाच येनयेनावतारेणभग
वान्हरिरीश्वर करोतिकर्णरम्याणिमनोज्ञा
निचनःप्रभो १ यच्छृण्वतोपैत्यरतिर्वितृ स

Indira Gandhi National
Centre for the Arts

त्वविश्रुतं यच्चिरेण पुंस भक्तिर्हरौ तत्पुरुषे
वसख्यं तदेवहारं वदमन्यसे चेत् २ प्राथा
न्यदपि कृष्णस्य तोकाचरितमद्भुतं मानुषं
लोकमासाद्य तज्जातिमनुरुंधत ३ श्रीशु
कउवाच कदाचिदौत्थानिककौतुकालवे ज
न्मर्क्षयोगेसमवेतयोषितां वादित्रगीतद्वि
जमंत्रवाचकैश्चकारसूनोरभिषेचनं स
ती ४ नंदस्य पत्नीकृतमज्जनादिकं विप्रैः

कृतस्वस्त्ययनं सुपूजितैः अन्नाद्यवासःस्रगभी
ष्टधेनुभिः संजाततिंद्राक्षमसीशयच्छनैः ५ औ
त्थानिकौत्सुक्यमना मनस्विनी समागतान्पूजय
ती व्रजौकसः नैवाशृणोद्वै रुदितं सुचेतसा रुद
न्स्तनार्थी चरणावुदक्षिपत् ६ अधःशयान
स्य शिशोरथोल्पकं प्रवालमृद्वंघ्रिहतं व्यवर्तत
विध्वस्तनानारसकुप्यभाजनं व्यतस्यच क्राक्षविभि
न्नकूबरं ७ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रियः

श्रोत्थानिकेकर्मणियासमागताः नंदादयश्चानु
तद्दर्शनाकुलाः कथंस्वयंवैशाकटंविपर्यगा
त् उचुरव्यवसितमतीन्गोपान्गोपीश्चबालका
रूदतानेनपादेनक्षिप्तमेतन्नसंशयः ८ नतेश्र
दधिरेगोपाबालभाषितमेत्युत अप्रमेयबलंत
स्यबालकस्यनतेविदुः १० रुदंतंसुतमादा
यपशोदाग्रहशंकिता कृतस्वस्त्ययनंविप्रैःसू
क्तैःस्नानमपाययत् ११ पूर्ववत्स्थापितंगोपै

र्बलिभिःसपरिच्छदं विप्राहुत्वार्चयांचक्रुर्द
ध्यक्षतकुशांबुभिः १२ येऽसूयानृतदंभेर्ष्याहिं
सामानविवर्जिता नतेषांसत्यशीलानामा
शिषोविफलाःकृता १३ इतिबालकमादा
यसामर्ग्यजुरुपाकृतैः हुत्वाचाग्निंद्विजा
तिभ्यःप्रादान्नंमहागुणं १५ गावःसर्वगु
णोपेतावासःस्रग्रुक्ममालिनी आत्म
जाभ्युदयार्थाय प्रादात्तेचान्वयुंजत १६

Indira Gandhi National Centre for the Arts

३४८ विप्रामंत्रविदोयुक्तास्तैर्याः प्रोक्तास्तथाशिषः
महीचरितं तानिष्फला भविष्यंति न कदाचिदिति स्फुटं
१७ देकदारोहमारूढं लालयंति स्म तं सती
गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत् १८
भूमौ निधाय तं गोपी विस्मिता भारपीडिता म
हापुरुषमादध्यौ जगतामासकर्मसु १९
दैत्यो नाम्ना तृणावर्तः कंसभृत्यप्रचोदितः
चक्रवातस्वरूपेण जहारासीनमर्भकं २०